E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.019

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# व्यञ्जनावृत्तिविचारः

**डॉ.ऋतेशा**
**सहायकाचार्या**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**श्री रघुनाथकीर्तिपरिसरः, देवप्रयागः**
**दूरभाषाङ्कः- 9205758845**
**ईमेल - ritesha.csu@sanskrit.ac.in**

**सङ्क्षिप्तसारः** - भारतीयकाव्यशास्त्रे शब्दार्थयोः समन्वयः साहित्यस्य मूलाधारः इति स्वीकृतः। "शब्दार्थौ सहितौ काव्यम्" इति प्रसिद्धसूक्त्या काव्यस्य स्वरूपं निरूपितम्। काव्ये शब्दस्य तिस्रः शक्तयः अभिधा, लक्षणा, व्यञ्जना चेति आचार्यैः स्वीकृताः। अभिधया मुख्यार्थस्य बोधः भवति, लक्षणया बाधितमुख्यार्थात् गौणार्थस्य प्रतीतिः जायते, व्यञ्जनया तु सूक्ष्मः, रसात्मकः, अलौकिकः च अर्थः प्राप्यते , स एव व्यङ्ग्यार्थ इति कथ्यते। व्यङ्ग्यार्थः काव्यस्य आत्मा इति आनन्दवर्धनादिभिः प्रतिपादितम्। यतो हि काव्ये रसभावसौन्दर्यचमत्कारादीनां अनुभूतिः व्यञ्जनावृत्त्या एव सम्भवति। केवलं वाच्यार्थज्ञानं काव्यस्य पूर्णास्वादाय न पर्याप्तम्। सहृदयपाठकः एव व्यङ्ग्यार्थस्य गाम्भीर्यं ग्रहीतुं समर्थः भवति। अस्मिन् शोधपत्रे मम्मट-आनन्दवर्धन-विश्वनाथप्रभृतीनामाचार्याणां मतानुसारेण व्यञ्जनासिद्धान्तस्य स्वरूपं विवेचितम्। एतेषां मतं यत् व्यङ्ग्यार्थबोधः न अभिधया, न लक्षणया, न च अनुमानप्रमाणेन सम्भवति, अपितु केवलं व्यञ्जनाशक्त्या एव भवति।

**कूटशब्दाः**-काव्यम्,शब्दशक्तिः,अभिधा,लक्षणा,व्यञ्जना,वाच्यार्थः,लक्ष्यार्थः,व्यङ्ग्यार्थः,ध्वनिः,शाब्दी व्यञ्जना,आर्थी व्यञ्जना,अभिधामूला व्यञ्जना,लक्षणामूला व्यञ्जना ।

**शोधलेखः**

सहितयोः भावः साहित्यं कथ्यते, यत् शब्दार्थावधारितम् एव भवति, **"शब्दार्थौ सहितौ काव्यम्"[1] इति**। अतः काव्यशास्त्रिभिः त्रयशब्दाः त्रयोऽर्थाः तिस्रश्च तेषां शक्तयः स्वीकृताः। यथोक्तं मम्मटेन-

**"स्याद्वाचको लाक्षणिकःशब्दोऽत्रव्यञ्जकस्त्रिधा"।**
**वाच्यादयस्तदर्थाःस्युः"।[2]**

प्रायः सर्वे काव्यशास्त्रिणः तिस्रः शब्दशक्तयः स्वीकुर्वन्ति।

**"वाच्योऽर्थोभिधया बोध्यो लक्ष्यो लक्षणया मतः।**
**व्यङ्गयो व्यञ्जनया ताः स्युः तिस्रः शब्दस्य शक्तयः"॥[3]**

---

[1] साहित्यदर्पणम्

[2] काव्यप्रकाश द्वि. उ.

[3] साहित्यदर्पणम् २/३

तथापि केचन साहित्यशास्त्रिणो मुकुलभट्टमहिमभट्टादयो व्यञ्जनां न अभिमन्यन्ते। तेषां मते यो व्यङ्ग्यार्थः, तस्य ज्ञानं तात्पर्येण अनुमानेन लक्षणया वा भवितुं शक्यते।

व्यङ्ग्यार्थस्य प्रतीतिकृद्वृत्तिर्व्यञ्जना नाम। अतः मम्मटविश्वनाथादिभिरुक्तं यत् व्यञ्जना न लक्ष्यार्थः, न तात्पर्यार्थः, न अनुमानार्थः अपितु एतेभ्यः पृथक् एव वर्तते। व्यङ्ग्य-व्यञ्जकयोः सम्बन्धेऽपि व्यञ्जना एव। वृत्तेरर्थः व्यवहारः। यदा वयं व्यञ्जनां शब्दस्य वृत्तिरिति मत्त्वा पश्यामश्चेत् तदा तस्य अर्थः भवति - शब्दस्य व्यवहारः। व्यवहारोऽयम् अभिधावृत्त्या गौणीवृत्त्या तात्पर्यवृत्त्यया च पृथक् वर्त्तते।

यस्य व्यङ्ग्यार्थस्य प्रतीतिः व्यञ्जनावृत्त्या भवति, स व्यङ्ग्यार्थोऽपि नियतानियतपरम्परितसम्बन्धनिष्ठः भवति। व्यङ्ग्यार्थः काव्ये अवश्यमेव स्यात्, सः तत्र प्रधानं भवतु गौणं वा भवतु। व्यङ्ग्यार्थः काव्ये स्वकीयं पृथगेव स्थानं स्थापयति। व्यङ्ग्यार्थस्य स्वरूपं निरूपयन् आचार्यानन्दवर्धनोऽप्याह –

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**

**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**[1]

यथा अङ्गनासु मुखनेत्रश्रोत्रनासिकादिप्रसिद्धावयवैः व्यतिरिक्तं लावण्यं निर्वर्ण्यमानं सकलावयवव्यतिरेकि पृथगेव किमप्यन्यद् तत्त्वं भवति, तद्वदेव सोऽर्थः (प्रतीयमानार्थः/व्यङ्ग्यार्थः) काव्ये वाच्यार्थालङ्कारादिभिः पृथक् एव भासते। महाकवीनां वाणीषु व्यङ्ग्यार्थः निहितः भवति। तद्यथा-

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**

**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥**[2]

तं रसस्वरूपम् अर्थतत्त्वं निःष्यन्दमाना महाकवीनां वाक् तेषामलौकिकप्रतिभायाः (अपूर्ववस्तुनिर्माणक्षमायाः प्रज्ञायाः) वैशिष्ट्यं प्रकटयति। अतः सत्यमाह ध्वनिकारः - अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा एव वा महाकवय इति गण्यन्ते।[3]

व्यङ्ग्यार्थस्य प्रतीतिः वाच्यार्थपूर्विका भवति। वाच्यादनन्तरं व्यञ्जनावृत्त्यर्थम् आचार्यानन्दवर्धनः कथयति –

**यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।**

**वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः॥**[4]

यथा पदार्थेन (पदार्थयोः उपस्थित्यनन्तरं पदार्थसंसर्गरूपः) वाक्यार्थः प्रतीयते, तद्वदेव तस्य व्यङ्ग्यार्थस्य प्रतीतिः वाच्यार्थपूर्विका भवति। वस्तुतः व्यञ्जनायाः अवधारणा भारतीयकाव्यशास्त्रस्य महती उपलब्धिः वर्त्तते। या काव्यार्थस्य सकलमपि क्षेत्रमालोकयति।

सा च व्यञ्जना द्विधा विभज्यते – १. शाब्दी व्यञ्जना २. आर्थी व्यञ्जना। यतोहि व्यञ्जकत्वमुभयोः भवति, शब्दस्य अथ च अर्थस्यापि। अतः व्यञ्जनायाः द्वौ भेदौ।

शाब्दी व्यञ्जनामाचार्यमम्मटः द्विधा विभजते- १. अभिधामूला २. लक्षणामूला।

१. अभिधामूला व्यञ्जना –

अनेकार्थकशब्दानां समस्या वैयाकरणैरपि स्वीकृता। कस्मिन्नपि प्रसङ्गविशेषे अनेकार्थकशब्दानामर्थस्य विनिश्चयः कथं स्यादिति?

कथयति आचार्यमम्मटः –

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**

---

[1] ध्वन्यालोकः १/४

[2] ध्वन्यालोकः १/६

[3] ध्वन्यालोकः, वृत्तिभागः १/६

[4] ध्वन्यालोकः १/१०

**संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्॥**[1]

संयोगाद्यैरनेकार्थकशब्दस्य वाचकत्वे नियन्त्रिते सति अवाच्यार्थस्य प्रतीतिकृद् व्यापारः व्यञ्जना नाम। स च शब्दस्य व्यापारः। अर्थविनिश्चित्यर्थं वैयाकरणैः कतिपय-अभिधानियामकानां नियमानां विधानं कृतम्। ते च-

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**

**सामर्थ्यमौचितिः देशः कालो व्यक्तिः स्वरादयः।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥**[2]

शब्दस्य सम्यक् अर्थं निर्णेतुम् उपर्युक्तानि निर्णयस्याधारत्वेन भवन्ति। शब्दवैशिष्ट्यादियं व्यञ्जना, अतः शाब्दी व्यञ्जना। अनया व्यञ्जनया युक्तः शब्दः व्यञ्जकः भवति-

**तद्युक्तो व्यञ्जकः शब्दः।**[3]

तत्र प्राथम्येन प्राकरणिकार्थस्य प्रतीतिः भवति, तदनन्तरं व्यङ्ग्यार्थस्य। अतः स प्राकरणिकार्थोऽपि व्यञ्जक एव। तस्य प्राकरणिकार्थस्य सहकारित्वं सिद्धमेव –

**सोऽर्थान्तरयुक् तथा।**

**अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः॥**[4]

२. **लक्षणामूला-शाब्दी-व्यञ्जना** –

मुख्यार्थे नोपपन्ने सति गौणवृत्तेः (लक्षणायाः) व्यवहारः भवति। परं मुख्यां वृत्तिं परित्यज्य गौणवृत्तेराश्रयः कस्यापि विशिष्टप्रयोजनस्य कृते नीयते। यथा गङ्गातटे स्थितस्य ग्रामस्य पवित्रशैत्यवातावरणस्यातिशयोक्त्यै कथ्येत- "गङ्गायां घोषः"। अर्थात् वक्तुः प्रयोजनमस्ति यत् ग्रामः एतावत् पवित्रः अस्ति, यथा गङ्गाप्रवाहे एव स्थितस्स्यात्। अस्य शैत्यातिशयपावनातिशयरूपप्रयोजनस्य कारणेनैव "गङ्गायां घोषः" वाक्योऽयमभिहितः। अभिधया अत्र अर्थः न सम्भवति, यतोहि अभिधार्थः भवति "गङ्गाप्रवाहे ग्रामः", यच्च सर्वथा असम्भवम्। अतएव अस्य बाधः भवति पुनश्च गङ्गा-प्रवाहेण सम्बद्धः तटरूपार्थः लक्षणया (शब्दस्य गौणवृत्त्या) उपस्थितः भवति।

मुख्यार्थस्य बाधः अभवत्, ततः लक्ष्यार्थः, तदा प्रयोजनस्य शैत्यपावनत्वादेः प्रतीतिः कया वृत्त्या भविष्यति? अस्य प्रयोजनस्य प्रतीतिः व्यञ्जनावृत्त्या भवति। प्रयोजनरूपार्थस्य तटं मुख्यार्थं मत्त्वा अपि, तेन सम्बन्धः न भवति, यतोहि शैत्यपावनत्वादेः सम्बन्धः गङ्गाशब्देन वर्त्तते। प्रयोजन[5]-विशिष्टलक्ष्यार्थम् अतः न मन्तुं शक्नुमः, यतोहि सर्वे दार्शनिकाः ज्ञानस्य विषये तस्य फले च पार्थक्यं मन्यन्ते।[6]

अतः प्रयोजनस्य प्रतीतिः व्यञ्जनया एव भविष्यति। लक्षणायाः प्रवृत्त्यनन्तरं प्रयोजनस्य प्रतीतिः व्यञ्जनया भवति, अतएव लक्षणामूला-व्यञ्जना उच्यते।

---

[1] काव्यप्रकाशः २/१९

[2] काव्यप्रकाशः २/१९

[3] का. प्र. आ. वि. द्वि. उ. पृ. ८१

[4] का. प्र. आ. वि. द्वि. उ. पृ. ८१

[5] प्रयोजनेन सहितं लक्षणीयं न युज्यते पृ. ७५

[6] ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् पृ. ७६

**आर्थी व्यञ्जना** – यत्र एकः अर्थः, प्रकरणवशादन्यार्थस्य प्रतीतिं कारयेत्, सा आर्थी व्यञ्जनेत्युच्यते। अस्य प्रतीतिः कथं भवति? अस्मिन् प्रसङ्गे मम्मटाचार्यः लिखति-

**वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः।**

**प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्।**

**योऽर्थस्यान्यर्थधीर्हेतुर्व्यापारो व्यक्तिरेव सा॥**[1]

आर्थी व्यञ्जनायामेकः अर्थः अन्यार्थस्य प्रतीतिकृद् भवति, परमयं व्यञ्जकार्थः शब्दप्रमाणेनैव ज्ञायते—अतः अर्थस्य व्यञ्जकत्वे शब्दस्य सहकारिता निर्विवादरूपेण सिद्धा। अत एवोक्तम्-

**शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः।**

**अर्थस्य व्यञ्जकत्वे तत् शब्दस्य सहकारिता॥**[2]

शब्दप्रमाणेन यः अर्थः ज्ञायते, स एव अर्थान्तरं व्यनक्ति। अतः अर्थस्य व्यञ्जकत्वे शब्दस्य सहकारिता भवति। अस्यार्थः अयमपि भवति यत् शब्दप्रमाणवेद्योऽर्थः एव व्यञ्जकः भवति, केनापि अन्येन वेद्योऽर्थः न-

**"न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः"**[3]

अतः अनुमानादिभिः प्रमाणैः प्राप्तस्यार्थस्य व्यञ्जकत्वमत्र निषिध्यते।

साहित्यदर्पणकारेण पञ्चमपरिच्छेदे व्यञ्जनायाः स्थापना कृता। तेन पूर्वेषां खण्डनं कृत्वा व्यञ्जना स्थापिता। स व्यञ्जनां लक्षयन्नाह - **"शब्दबुद्धिकर्मणां विरम्य व्यापारभावः"इति** नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं-स्वम् अर्थं बोधयित्वोपक्षीणासु ययान्योऽर्थः बोध्यते सा शब्दस्य अर्थस्य शक्तिर्व्यञ्जनध्वनन-गमन-प्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। अतः यदा अभिधाद्याः वृत्तयः स्वम्-स्वमर्थं प्रकट्य विरताः भवन्ति तदा या अन्या वृत्तिः आगच्छति सा वृत्तिर्व्यञ्जना नाम। यथोक्तम्-

**"विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।**

**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च"॥**[4]

यथा- कश्चिज्जनः अन्धकारवशाद् रज्जुं दृष्ट्वा सर्पप्रतीतिः करोति, तथा सर्पबुद्धिवशाद्भीतोजातः, पुनः केनापि उपायेन तस्य पूर्वबुद्धेः ज्ञानं बहिर्कर्तुं कोऽपि न क्षमः। अनेन प्रकारेणैव शक्तिरपि स्वव्यापारं एकवारम् एकधा, एकमेव व्यापारं कर्तुं क्षमा। अतः स्वार्थं उपस्थितीकृत्य अभिधालक्षणातात्पर्यादिशक्तीनां एकदा उपक्षीणासु व्यञ्जनावृत्त्या एव व्यङ्ग्यार्थज्ञानं भवति नान्यया।

**"वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम्।**

**अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम्"॥**[5]

अभिधालक्षणातात्पर्याख्यानां वृत्तीनां विश्रान्तेः सति व्यञ्जना नाम तुर्यावृत्तिः एव रसादिबोधने क्षमा नान्या काऽपि। अतः तुर्यावृत्तिः आवश्यकी।**अभिधा लक्षणा च न व्यङ्ग्यार्थबोधिका-** व्यञ्जनावृत्तेः अभिधायाम् अन्तर्भावः न सिद्ध्यति, यतोहि न व्यङ्ग्यार्थस्य अभिधया ज्ञानम्। अभिधावृत्तिः तु संकेतितमात्रावबोधने एव समाप्ता भवति, सा वृत्तिः न वस्त्वलंकाररसादिव्यङ्ग्यबोधने क्षमा। यतो हि रसादयो न संकेतिताः, रसादीनां

---

[1] काव्यप्रकाशः, तृ. उ. पृ. ८२

[2] काव्यप्रकाशः ,तृ. उ. पृ. ८९

[3] काव्यप्रकाशः ,तृ. उ. पृ. ८९

[4] साहित्यदर्पणे- २/१३

[5] साहित्यदर्पणे- ५/१

स्थायिभावानां व्यभिचारिणाञ्च तु स्वशब्दवाच्यत्वेन तु दोष एव। यथा उक्तं विश्वनाथेन रसदोषप्रसंगावसरे-**"रसस्योक्तिःस्वशब्देन स्थायिसंचारिणोरपि॥**[1] नहि विभावानुभावव्यभिचारिभिः रसादीनाम् अभिधानं भवति। यत्र तु रसादीनां स्थायिभावानाञ्च स्वशब्देनोच्चारणं भवति, स तु दोषः। यथा- **शृङ्गाररसोऽयम् इति** कथनेन न शृङ्गाररसस्य प्रतीतिः।

**बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम्।**

**आश्रयाविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः॥**[2]

अनेन प्रकारेण अभिधायाः स्वरूपं भिन्नं तथा व्यञ्जनास्वरूपं भिन्नमेव वर्तते। बोद्धृ-स्वरूप-संख्या-निमित्त-कार्य-प्रतीति-काल-आश्रय-विषयभेदाच्च व्यङ्ग्यार्थस्य भेदः दर्शितः।

व्यञ्जनावृत्त्याः विना रसादीनां ज्ञानं न सम्भवति । -

**प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।**

**किं च मुख्यार्थबाधस्य विरहादपि लक्षणा॥**[3]

शब्दव्यापारेण पूर्वं रसस्य सत्ता न भवति, अतः लक्षणाभिधेन रसज्ञानं न भवति, ते तु तस्यैव ज्ञानं कारयितुं समर्थे यस्य सत्ता भवति। रसं तु आस्वादनव्यापारेण भिन्नया कयापि शक्त्या ज्ञातुं न शक्नुमः। रसस्य स्थले मुख्यार्थबाधः न आवश्यकः। अतः लक्षणया व्यङ्ग्यार्थः न ज्ञायते।

**तात्पर्याख्यावृत्तिः न व्यङ्ग्यार्थबोधिका -**

अभिहितान्वयवादिभिः मीमांसकैश्च स्वीकृता तात्पर्याख्यावृत्तिरपि न व्यङ्ग्यार्थबोधिका। तात्पर्यावृत्तिरपि संसर्गमात्रे परिक्षीणा न व्यङ्ग्यबोधिनी। यथोक्तम्-'**सोऽयमिषोरिवदीर्घदीर्घतरोऽभिधाव्यापारः**' इति। अर्थात् तात्पर्यभिन्ना कापि व्यञ्जना नाम शक्तिः न वर्तते। यावद् अर्थः भवति तावद् पर्यन्तं अर्थज्ञानं तात्पर्यशक्त्या एव भवति। सा वृत्तिः **यावत्कार्यप्रसारी** भवति, तस्य परिमाणं ज्ञातुं न शक्यते।

**अनुमानं व्यङ्ग्यार्थे न बोधनक्षमः -**

व्यक्तिविवेककारेण महिमभट्टेन व्यङ्ग्यार्थम् अनुमानान्तर्गतं स्वीकृतम्, तथा व्यञ्जनायाः खण्डनं कृतम्। तस्य निराकरणार्थं विश्वनाथेनोक्तम्-

**नानुमानं रसादीनां व्यङ्ग्यानां बोधनक्षमम् ।**

**आभासत्त्वेन हेतूनां स्मृतिर्न च रसादिधीः॥**[4]

एवम्प्रकारेण अनुमानेन अर्थात् व्याप्तिविशिष्टज्ञानेन रसादिरूपव्यङ्ग्यार्थः न ज्ञायते। यतो हि अनुमाने हेतुः सत्भवति, तथा व्यङ्ग्यार्थस्य अनुमानकरणे ये हेतवः निर्मीयन्ते ते तु आभास एव हेत्वाभासश्च वा। हेतूनाम् असतभावात् रसादीनां प्रतीतिः स्मृतिरपि न भवति। विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते।

**द्वितीयं कारणम्-**

महिमभट्टेनोक्तं यत्- 'यत्र-यत्रैवं विधानां विभावानुभाव-सात्त्विकसञ्चारिणाम् अभिधानाभिनयोर्वा तत्र-तत्र श्रृङ्गारादिरसाविर्भावः' इति सुग्रहैव व्याप्तिः पक्षधर्मता च। यथोक्तम्-

**यार्थान्तराभिव्यक्तौ वः सामग्रीष्टानिबन्धनम्।**

---

[1] साहित्यदर्पणे- ७/१२

[2] साहित्यदर्पणे- ५/२

[3] साहित्यदर्पणे- ५/३

[4] साहित्यदर्पणे ५/४

**सैवानुमितिपक्षे नो गमकत्वेन संमता॥**[1]

इदमपि नो न विरूद्धम्। यतो हि पूर्वमेव कथितम् अनुमानेन तु अनुरागज्ञानमेव भवति। अस्माकं तु रसज्ञानमेव स्वप्रकाशज्ञानस्वरूपानन्दातिरेकचमत्कारयुक्तो रसः स्वीकृतः।

**वैयाकरणमते व्यञ्जनास्वरूपम् -**

न केवलं काव्यशास्त्रिभिरेव अपितु वैयाकरणैरपि व्यञ्जना अभिमता, यथा काव्यशास्त्रकारैः पूर्ववर्त्याचार्याणां मीमांसकमतावलम्बिनां काव्यशास्त्रकाराणां मीमांसकानाञ्च खण्डनपुरस्सरं व्यञ्जनायाः स्थापनाकृता, तथैव वैयाकरणैरपि नैयायिकमतावलम्बिनां खण्डनपुरस्सरं व्यञ्जनायाः स्वरूपः प्रतिपादितस्तथा च तस्याः आवश्यकतापि स्वीकृताः। यथाह परमलघुमञ्जूषाकारः -

**"ननु व्यञ्जना कः पदार्थः? उच्यते- मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना नाम"।**[2]

सा व्यञ्जना नाम वृत्तिः विशेषामुख्यार्थस्य बाधस्य निरपेक्षया एव स्वार्थस्य बोधं कारयति। तथा द्वितीयः सोऽर्थः मुख्यार्थसम्बद्धः कदाचित्भवति, तथा कदाचित् असम्बद्धः साधारणो भवति। तृतीयो हि प्रसिद्धार्थस्य अप्रसिद्धार्थस्य च बोधको भवति। चतुर्थश्च सोऽर्थः वक्तुः श्रोतुश्च वैशिष्ट्यज्ञानात् प्रतिभातः उद्बुद्धो भवति।

अतः अनेन प्रकारेण एतद् लक्षणं कृत्वा नैयायिकमतानां खण्डनं कृतं यल्लक्षणा नाम शक्तिः तु भिन्ना यतोहि मुख्यार्थबाधम् आकाङ्क्षते। परं व्यञ्जना नाम शक्तिस्तु मुख्यार्थस्य बाधनिरपेक्षेऽपि अर्थज्ञानं कारयति, पुनः तस्याः वैशिष्ट्यमुच्यते यत्सा सम्बद्धासम्बद्धार्थस्य ज्ञानं कारयति, स चाऽर्थः वक्तुः प्रतिभाविशेषात् वैशिष्ट्यज्ञानकारणाच्च प्रस्फुटितो भवति।

**मम्मटस्य मतम् -**

मम्मटमते न पूर्वपक्षिणां मतं कथितम्- यत् 'गङ्गायांघोषः' इत्यत्र यः व्यङ्ग्यार्थः वर्तते सः लक्षणया एव ज्ञायेत् एतदर्थं यः लक्ष्यार्थः वर्तते तत्रापि शैत्यपावनत्वाद्यर्थं 'गङ्गातटेघोषः' इत्यत्र अस्य बाधः स्यात्पुनः शैत्यपावनत्वादयः लक्ष्यार्थ भवेत्। एतन्न, यतो हि यदि शैत्यादयः लक्ष्यार्थः तस्य कारणं भवेत् रूढिः प्रयोजनं वा भवेत्तदा पुनः एकान्यर्थस्य कल्पनाकरणीयम्पुनः अन्यार्थस्य कल्पनाकरणीयम्, अनेन प्रकारेण अनवस्थादोषः तु भवति एव तदा कदापि मूलार्थस्य एव क्षयं भविष्यति। यथोक्तम्-

**"एवमप्यनवस्था स्यात्या मूलक्षयकारिणी"**[3]

एवं प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनान्तरेण, तदपिप्रयोजनान्तरेणेति प्रकृताप्रकृतिकृत् अनवस्था भवेत्। पुनः पूर्वाचार्याणां मतं कथितं यत्- यदि लक्षणया एव पावनत्वादियुक्ततटस्य ज्ञानं भवति, तदा लक्षणया एव विशिष्टार्थस्य बोधः भवेत्, पावनत्वविशिष्टतटे एव लक्षणा स्यात्? तदा उक्तम्- न।

**"प्रयोजनेन सहितं लक्षणीयं न युज्यते"**[4]

प्रयोजनेन शैत्यपावनत्वादिविशिष्टतीरसहितं ज्ञानं लक्ष्यार्थं न भवितुमर्हति। पुनः उक्तम्-ज्ञाततानुव्यवसायमतावलम्बिनोऽपि स्वीकुर्वन्ति यत्ज्ञानस्य विषयः पृथक्भवति तथा तस्य विषयः पृथक् एव भवति। यतोहि- घटं दृष्ट्वा पुनः ज्ञानं भवति यत् 'अयं घटः' इत्यत्र विषयज्ञानानन्तरमेव ज्ञानं भवति। मीमांसकानां मते- 'ज्ञातो मया घटः' इति ज्ञातता सिद्धान्तः वर्तते, पुनः नैयायिकानां मते 'घटज्ञानवानहम्' इत्यत्रापि विषयः, फलश्च पृथक्-पृथक् एव इति। अत उक्तम्-

---

1 साहित्यदर्पणे ५/४ वृत्तिभागः

2 परमलघुपञ्जुषायाम्- पृ०-६०

3 काव्यप्रकाशे- २/१७

4 काव्यप्रकाशे- २/१७

**"ज्ञानस्य विषयोह्यन्यः फलमन्यदुदाहृतम्"**[1]

एवं प्रकारेण लक्षणा न व्यङ्ग्यार्थाबोधिनी।

**ध्वनिकारस्य मतम् -**

आनन्दवर्धनेनापि ध्वनेः लक्षणायान्तर्भावस्य खण्डनं कृतम्। तैः पूर्वाचार्याणां मतं स्थापितम्—**"यद्यपि च ध्वनिशब्दसङ्कीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितः, तथापि अमुख्यवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्टोऽपि, न लक्षितः इति परिकल्प्यैवमुक्तम्- भाक्तमाहुस्तमन्ये इति।**[2] एतेषां मतावलम्बिनां खण्डनं कुर्वन् तेनोक्तम्-

**"भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः"।**[3]

अयमुक्तप्रकारो ध्वनिर्भक्त्या नैकत्वं बिभर्ति भिन्नरूपत्वात्। वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः। उपचारमात्रन्तु भक्तिः। "**उपचारो नामात्यन्तं विशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्"।**

ध्वनिः व्यङ्ग्यो वा ध्वनेः लक्षणं न भवितुं शक्यते। तदाह-

**"अतिव्याप्तेरथाव्याप्तेर्नचासौलक्ष्यते तया"।**[4]

न भक्तिः ध्वनेर्लक्षणम् अतिव्याप्तिरव्याप्तिदोषवशाद्, यतोहि ध्वनेः विपरीतस्थलेऽपि लक्षणा दृश्यते। यत्र व्यङ्ग्यकृतं महत्सौष्ठवं नास्ति तत्राप्युपचरित-शब्दवृत्या प्रसिद्ध्यनुरोधप्रवर्तितव्यवहाराः दृश्यन्ते। यथा-

**परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**

**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्।।**[5]

इत्यत्र 'वदति' एतत्पदं मुख्यार्थबाधयुक्तं वर्तते, तदा अर्थं भवति, प्रकटयतीति। अत्र चारूत्वाभावात् न ध्वनिः (व्यङ्ग्यार्थः)। अतः ध्वनेः भिन्नस्थलेऽपि लक्षणा दृश्यते। पुनः यथा-

**चुम्ब्यते शतकृत्वोऽवरुध्यते सहस्रकृत्वः।**

**विरम्य पुना रम्यते प्रियो जनो नास्ति पुनरुक्तम्।।**[6]

प्रियाः सहस्रवारं चुम्बन्ति, सहस्रवारं आलिङ्गन्ति, विरम्य पुनः रमणं कुर्वन्ति, तदापि पुनरुक्तिः न भवति। अत्र पुनरुक्तेत्यस्यबाधः भवति पुनः अर्थः भवति, प्रियाणां स्वप्रियेषु अनुपादेयतासिध्यति। अतः न व्यङ्ग्यार्थः। अतः सिद्धयति यत्लक्षणायाः क्षेत्रं व्यञ्जनेतरस्थलेषु अपि वर्तते। अपि च-

**"रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।**

**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः"।।**[7]

रूढाशब्दाः न व्यङ्ग्यविषयाः भवन्ति यथा- लावाण्याद्याः शब्दाः न व्यङ्ग्यविशेषाः।

**"मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।**

---

[1] काव्यप्रकाशे- २/१८

[2] का. प्र. आ. वि. पृ. ९

[3] ध्वन्यालोके- १/१४

[4] ध्वन्यालोके- १/१४

[5] का. प्र. आ. वि. पृ. ५९

[6] का. प्र. आ. वि. पृ. ६०

[7] ध्वन्यालोके- १/१६

**यदुद्दिश्यफलं तत्र शब्दो नैव स्खलद्गतिः"॥**[1]

तत्र हि चारूत्वातिशयविशिष्टार्थप्रकाशनलक्षणे प्रयोजने कर्तव्ये यदि शब्दस्यामुख्यता स्यात्, तदा तस्य प्रयोगे दुष्टतैव स्यात्। न चैवम्, तस्मात्-

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**

**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥**[2]

यस्याः शक्तेः वाचकत्वमेवाश्रयं वर्तते, सा लक्षणा नाम शक्तिः कथं व्यञ्जनायाः विषयो भवितुमर्हति। तस्याः लक्षणायाः शक्तेः वाचकत्वं मूलं वर्तते, परं व्यञ्जनायाः तु व्यञ्जकत्वमेव मूलं भवति। अत उक्तम्–

**तस्मादन्यो ध्वनिः, अन्या च गुणवृत्तिः। अव्याप्तिरप्यस्य लक्षणस्य। नहि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षणः। अन्ये च बहवः प्रकारा भक्त्या व्याप्यन्तः तस्माद्भक्तिरलक्षणम्।**[3]

**निष्कर्षः** –

एवम्प्रकारेण सिद्धं यत् व्यङ्ग्यार्थस्य ज्ञानम् अभिधालक्षणातात्पर्यादीनां माध्यमेन न भवितुमर्हति। अतः सर्वैरपि काव्यशास्त्रकारैः व्यञ्जना समाश्रिता। स च व्यङ्ग्यार्थः केवलं काव्यार्थतत्त्वज्ञैरेव ज्ञायते। तद्यथा-

**शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।**

**वेद्यते स तु काव्यार्थः तत्त्वज्ञैरेव केवलम्॥**[4]

कश्चन विशिष्टः शब्द एव तस्य व्यङ्ग्यार्थस्य व्यक्त्यै सामर्थ्ययोगी भवति, न तु शब्दमात्रम्। अतः तौ व्यङ्ग्य-व्यञ्जकौ सम्यक् ज्ञातव्यौ। ताभ्यामेव सुप्रयुक्ताभ्यां महाकवीनां महाकवित्वलाभः सम्भवति। ध्वनिकारोऽपि-

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**

**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥**[5]

एवं व्यञ्जना बहुशः प्रकीर्तिता। अस्या ज्ञानेनैव स अलौकिकरसस्वरूपव्यङ्ग्यार्थः ज्ञातुं शक्यते नान्यथा।

**सन्दर्भग्रन्थसूची-**


- ध्वन्यालोकः, व्याख्याकारः- आचार्यः विश्वेश्वरसिद्धान्तशिरोमणिः, प्रकाशनम्- ज्ञानमण्डल लिमिटेड, वाराणसी, संस्करणम्- २०१३
- काव्यप्रकाशः, व्याख्याकारः- आचार्यःविश्वेश्वरः, प्रकाशनम्- चौखम्बासुरभारतीप्रकाशनम्, संस्करणम्- २००३
- साहित्यदर्पणम्, व्याख्याकारः- शालिग्रामशास्त्री, प्रकाशनम्- मोतीलालबनारसीदासः, संस्करणम्- २००५
- परमलघुमञ्जूषा, व्याख्याकारः- जयशङ्करलालत्रिपाठी, प्रकाशनम्- चौखम्बाकृष्णदासअकादमी, वाराणसी, संस्करण- २०११;
- व्यञ्जना : सिद्धि और परम्परा, लेखकः- डा. कृष्णकुमारशर्म्ममहोदयः, प्रकाशनम्- चौखम्बा विद्याभवन वाराणसी-१, संस्करणम्- १९७२
- वाक्यपदीयम्, व्याख्याकारः- डा. शिवशङ्कर अवस्थी, प्रकाशनम्- चौखम्बा विद्याभवन वाराणसी, संस्करणम्- २०१०


[1] ध्वन्यालोके- १/१७

[2] ध्वन्यालोके- १/१८

[3] ध्वन्यालोकः आ. वि. पृ. ६५

[4] ध्वन्यालोके- १/७

[5] ध्वन्यालोके- १/८